# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 1 | गुणाः – ५० |
| विषयः – अनिवार्यसंस्कृतम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १३/०७/२०२१ | सन्दर्भग्रन्थः – उत्तररामचरितम् | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ कयोरपि द्वयोः पद्ययोः ससन्दर्भं व्याख्या कार्या ।**

१ कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि ।
त्वं कालेन तथाविधोऽस्यपहृतः सम्बन्धबीजं च तद्
घोरेऽस्मिन् मम जीवलोकनरके पापस्य धिग्जीवितम् ॥

२ पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्सजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति प्रकरति शकृत्पिण्डकानाम्रमात्रान्
किं वाऽऽख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥

३ योऽयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥

**प्रश्नः २ चतुर्थाङ्कस्य सारो लेख्यः ।**

**प्रश्नः ३ भवभूतेः जीवनचरित्रं चित्रयत ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः ससन्दर्भं व्याख्या कार्या ।**

१ मुनिजनशिशुरेकः सर्वतः सैन्यकाये नव इव रघुवंशस्याप्रसिद्धः प्ररोहः ।
दलितकरिकपोलग्रन्थटङ्कारघोरज्वलितशरसहस्रः कौतुकं मे करोति ॥

२ विनिवर्तित एव वीरपोतः पृतनानिर्मथनात् त्वयोपहूतः ।
स्तनयित्नुरवादिभावलीनामवमर्दादिव दृप्तसिंहशावः ॥

३ अत्यद्भुतादसि गुणातिशयात् प्रियो मे तस्मात् सखा त्वमसि यन्मम तत्तवैव ।
तत्किं निजे परिजने कदनं करोषि नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥

**प्रश्नः ५ पञ्चमाङ्कस्य सारो लेख्यः ।**

**प्रश्नः ६ 'कारुण्यं भवभूतिरेव तनुते' इति सिद्धं कुरुत ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या ।**

१ शान्तं महापुरुषसङ्गदितं निशम्य तद्गौरवात् समुपसंहृतसम्प्रहारः ।
शान्तो लवः प्रणत एव च चन्द्रकेतुः कल्याणमस्तु सुतसङ्गमनेन राज्ञः ॥

२ प्रियागुणसहस्राणामेकोन्मीलनपेशलः ।
य एव दुःस्मरः कालस्तमेव स्मारिता वयम् ॥

३ देवि सीते मनस्तेऽस्तु गतिर्नः पुत्रकौ हि ते ।
आलेख्यदर्शनं देवो यथाह रघुनन्दनः ॥

**प्रश्नः ८ सप्तमाङ्कस्य सारांशं लिखत ।**

**प्रश्नः ९ चन्द्रकेतोः चरित्रचित्रणं यथाग्रन्थं लिखत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ उत्तररामचरितस्य रचयिता कः ?
२ सामाजिकदृष्ट्या उत्तररामचरितं कीदृशं काव्यम् ?
३ रूपकस्य कति भेदाः भवन्ति ?
४ चतुर्थाङ्के कति श्लोकाः ?
५ सीता कीदृशी नायिका वर्तते ?
६ लक्ष्मणपुत्रस्य नाम किम् ?
७ महाकविना कति रचना रचिता ?
८ भवभूतेः स्थानं कुत्र वर्तते ?
९ लवकुशौ कस्य स्वरूपस्य प्रतिकृतिस्वरूपौ वर्तेते ?
१० षष्ठाङ्के कति श्लोकाः ?
११ पञ्चमाङ्कस्य नाम किम् ?
१२ ग्रन्थेऽस्मिन् कति स्त्रीपात्राणि सन्ति ?
१३ पात्रविशेषः दण्डायनः कः वर्तते ?
१४ सप्तमाङ्कस्य नाम किम् ?
१५ विद्याधरी का वर्तते ?

****